अथनामकरणप्रयोगः॥अस्यकुमारस्यआयुरभिवृद्धिव्यवहारसिद्धिबीजगर्भ
समुद्भवैनोनिबर्हणद्वाराश्री०र्थंनामकर्मकरिष्यइतिसंकल्प्य॥गणेशपूजन
स्वस्तिवाचनादिकुर्यात्॥केवलनामकर्मक्रियायांस्वस्तिवाचनमुपक्रम्यपु
ण्याहवाचनत्रयमुक्त्वा॥अमुकनाम्नेऽस्मैस्वस्तिंभवंतोब्रुवंत्वितिनिर्वदेत्॥
ब्राह्मणाश्चैतंनाम्नेऽस्मैस्वस्तीतिब्रूयुः॥ततश्चपुण्याहवाचनशेषंसमापयेत्॥
जातकर्मसहितनामकर्मक्रियायामस्यकुमारस्यजातकर्मनामकर्मणोःपुण्या
हंभवंतोब्रुवंत्वितिस्थानेप्रयुंक्ते॥अस्यकुमारस्यजातकर्मणे एतंनाम्ने
ऽस्मैस्वस्तिंभवंतोब्रुवंत्वितिनिर्वदेत्॥तदनुसारिप्रतिवचनेब्राह्मणैर्दत्ते॥
अस्यकुमारस्यजातकर्मनामकर्मणोःऋद्धिंभवंतोब्रुवंत्वितिनिर्व०॥ऋ
ध्यतामितिब्राह्मणाप्रतिब्रूयुः॥पुण्याहशेषंसमाप्य॥नांदीश्राद्धांतंकृत्वा॥
आचारप्राप्तंनामदेवतापूजनंकुर्यादित्यर्थः॥तंडुलपूर्णकांस्यपात्रेसुवर्ण
शलाकया॥श्रीगणेशायनमइतिलिखित्वा॥कुलदेवतानामलिखेत्॥

राम
१

श्रीनृसिंहभक्त इत्यादि ॥ ततो मासनाम कृष्ण इत्यादि ॥ ततो नाक्षत्रनाम कृ
त्तिका इत्यादि ॥ ततो व्यावहारिकं नाम शिवशर्मेति ॥ ततो नामदेवता
भ्यो नम इति तेषु स्थानेषु नामदेवता आवाहयेत् ॥ तदनु प्रतिमा स्वरूपा गृ
हा वै प्रतिष्ठाप्य ॥ नाममंत्रेण षोडशोपचारैः तं पूज्य ॥ बालस्य दक्षिणकर्णे
उपदिशेत् ॥ तद्यथा ॥ इदमार्यः कुमारस्य नामान्यविदधाम्यहमिति शिश्रा
पितृब्राह्मणैरनुज्ञातः ॥ श्रीगणपतये नम इति ॥ कुलदेवतानाम नृसिंहभ
क्तोसि ॥ मासनाम कृष्णोसि ॥ नाक्षत्रेण नाम्ना कृत्तिकोसीत्युपांशु वदेत् ॥
ततो व्यावहारिकेण नाम्ना शिवशर्मासीति ॥ तदनु प्रतिमा स्वरूपा गृहा वै प्र
तिष्ठेत्युक्त्वा ॥ सुप्रतिष्ठितं नामास्त्विति ब्राह्मणाः प्रवदेयुः ॥ ततः कर्तातिष्ठन् १
कुलदेवताप्रयुक्त नाम्ना श्रीनृसिंहभक्तोयं भवतः सर्वान् ब्राह्मणान् अभि
वादयतीति वदेत् नमस्कुर्यात् ॥ ते च आयुष्मान् भवतु ॥ एवं कुलदेवताप्र

युक्तनाम्ना नृसिंहभक्त इति वदेयुः ॥ एवं कर्तमासप्रयुक्तनाम्ना कृष्णोयंभ
वतः सर्वा० इयतां ॥ तेच आयुष्मा० एवं मासप्रयुक्तनाम्ना कृष्ण इति वदेयुः ।
कर्तोपांशु वदेत् ॥ नाक्षत्रप्रयुक्तनाम्ना कृत्तिकोयंभवतः सर्वा० अभि
वादयेद्गुरुचैः तेच आयुष्मान् भवतु ॥ भवदुक्तप्रयुक्तनामेति वदेयुः ॥
कर्ता व्यावहारिकप्रयुक्तनाम्ना श्रीधरशर्मायंभवतः सर्वा० इयतां ॥ तेच
आयुष्मान् भवतु । एवं व्यावहारिकप्रयुक्तनाम्ना श्रीधरशर्मेति वदेयुः ॥ तद
स्कभिआवरूणां गृहीत्वैप्रति० नामचतुष्टयस्य प्रतिष्ठितमस्तु ॥ ततः
कृतस्य नामकर्मणः संपूर्णतासिद्ध्यर्थं दशावरान् ब्राह्मणान् भोजयिष्ये
इति संकल्प्य ॥ भूयसीदानं च संकल्प्येश्वरार्पणं कुर्यात् ॥ प्रयोगकाले
पि अभिवादनीयनाम उपांशुत्वमाहुः शौनकः ॥ इति पुंसां नामकर्मप्रयोगः ॥
॥ ७ ॥ अथ स्त्रीणां ॥ संकल्पे स्याः कुमार्या इति विशेषः ॥ स्वस्तिवा

चनेएतंनाम्ये अस्येस्वस्तिभवंतो भुवंत्विति॥ स्वस्तिवाचनांतेनामा
निलिखेत॥ भक्तेत्वावतं कुलदेवतानाम॥ मातृनाम चरुक्मिणीजे
कुंठीवासुदेवीतितिविनिवंनानि॥ ॥ त्रिपवेदवृदनामास
दाशिवेनालिखितं॥ ॥

२